# Shivarya Stuti

# શિવાર્યાસ્તુતિઃ

## Document Information

Text title : Shivarya Stuti

File name : shivAryAstutiH.itx

Category : shiva, stuti

Location : doc_shiva

Proofread by : Sivakumar Thyagarajan Iyer

Description/comments : 44 in Stotrasamuchchaya 1, Edited by Pandit K. Parameshwara Aithal

Latest update : September 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2023

*sanskritdocuments.org*

# શિવાર્યાસ્તુતિઃ

ૐ શ્રીગણેશાય નમઃ ।

દ્રુતકનકભાસુરાઙ્ગં કુમુદવનીબન્ધુપાકચૂડાલમ્ ।
સ્મેરલવમઞ્જુલાસ્યં શૈલસુતાશ્લિષ્ટમાશ્રયે દેવમ્ ॥ ૧॥

કરુણારસાર્દ્રનયનં કરધૃતવિજ્ઞાનમુદ્રમતિભદ્રમ્ ।
ન્યગ્રોધમૂલભવનં ન્યક્કૃતનતમોહમાનમામીશમ્ ॥ ૨॥

ગાઙ્ગેયદ્રવલહરીપ્રૌઢતનુચ્છાયસુન્દરમુદારમ્ ।
હૈમવતીરસનિર્ભરનયનાસેચનકનૈજલાવણ્યમ્ ॥ ૩॥

ઉદ્યદ્બહુવિદ્યુદ્ઘણહૃદ્યજટાનદ્ધનિર્જરધુનીકમ્ ।
અઙ્ગજતનુભઙ્ગકલાસઙ્ગતનિટિલાક્ષતુઙ્ગભૂમાનમ્ ॥ ૪॥

શમ્ભો તાવકવિનુતૌ વિગલદ્ગર્વો હિ ભારતીજાનિઃ ।
સ્તુતિકાઙ્ક્ષા મમ તનુતે ગ્રાવ્ણાં તરણસ્ય જલનિધૌ સમતામ્ ॥ ૫॥

વિધિમાધવદુરધિગમં શીર્ષં ચરણં ચ તાવકં ગદિતમ્ ।
વેદ્યો ભવસિ કથં મે નિટિલગતા ભાગ્યરેખિકા કીદૃક્ ॥ ૬॥

ગૂઢાર્થૈર્ભવ વેદૈરર્થપ્રવણૈઃ પુરાણવચનૈસ્ત્વામ્ ।
પુરુષમતિદુર્નિરૂપ્યૈસ્તન્ત્રૈઃ શક્નોમિ કથમહં વેત્તુમ્ ॥ ૭॥

ક્ષિત્યાદિ કાર્યમખિલં સદધિષ્ઠાનં સકર્તૃકં ગદિતમ્ ।
કર્તા નૈવ જડઃ સ્યાદાદ્યઃ શમ્ભો શ્રુતીરિતસ્ત્વમિતિ ॥ ૮॥

ઉત્પાદકોઽસિ જગતામકરોસ્તરલં તુ મામકં હૃદયમ્ ।
ગૌરીપતે કથં ત્વં ધ્યેયો ભૂયાઃ કિમસ્તિ મયિ દોષઃ ॥ ૯॥

ચાપલ્યાદૈન્દ્રિયકાદ્ ધ્યાતું શક્નોમિ નાથ તવ મૂર્તિમ્ ।
અન્તે સવિધકૃતાન્તે શમ્ભો શક્ષ્યામિ કથમહં શ્રાન્તઃ ॥ ૧૦॥

કૃતકેતરવચનાઞ્ચલપટલીપેટીનિગૂઢનિહિતં તે ।

નગજાજાને જાનેઽમાનં મહિમાનમિહ કથં મૂઢઃ ॥ ૧૧॥

પૂર્ણં ચિદ્ઘનમેકં ત્વામિન્દ્રં વરુણમર્કમીશાનમ્ ।
માયાવઞ્ચિતહૃદયા બ્રુવતે વાગિતિ સનાતની બ્રૂતે ॥ ૧૨॥

ઉલ્લઙ્ઘ્ય તાવકાજ્ઞામુડુપતિશકલાવતંસ રચિતાગાઃ ।
ભવશતતાપગ્લપિતઃ શરણં ત્વામેવ નિસ્ત્રપઃ પ્રાપમ્ ॥ ૧૩॥

અગતિમધુના વરાકં શ્રાન્તં નિતરાં ભવાબ્ધિપતિતં મામ્ ।
તારય કટાક્ષનાવા કરુણાવરુણાલયોઽસિ વિશ્વેશ ॥। ૧૪॥

અન્તર્યામિણમાહ ત્વામેવાકૃતકભારતી યસ્માત્ ।
જ્ઞાતમહો હતહૃદયં વારિતમપિ તેન મદ્વશં નૈતિ ॥ ૧૫॥

અમવોઽસિ દેવ યત્ ત્વં વેત્સિ ભવોદ્દામયાતનાં નાતઃ ।
દીનપરિદેવનં મે શ્રુત્વાપિ ત્રાતુમુદ્યતો નાદ્ય ॥ ૧૬॥

પતિતમપિ પાદપતિતં પાવનચરિતં તનોષિ ગુણભરિતમ્ ।
આદ્યતમાવદ્યતમો હૃદ્યનવદ્યાદ્ય વારયાચ્છિદ્ય ॥ ૧૭॥

અર્વાઙ્ગીકુરુષે તામાર્યામુન્મત્તશેખરો યસ્માત્ ।
ઊરીકૃત્યાવસિ માં કામિનમિતિ કિં નુ ધૈર્યમવલમ્બે ॥ ૧૮॥

શ્રુત્યઞ્ચલમઞ્ચગતો માં ચલમનસં વિહાય નગજેશ ।
વઞ્ચયસિ કિં ચરેયં ચઞ્ચાસદૃશસ્વકિઞ્ચનઃ કિઞ્ચ ॥ ૧૯॥

રક્ષિતુમખિલાધ્યક્ષ ત્ર્યક્ષ સુદક્ષોઽપ્યુપેક્ષસેઽપક્ષમ્ ।
નેક્ષે રક્ષકમિતરં માત્રોપેક્ષ્યં કિમીક્ષતે પથિકઃ ॥ ૨૦॥

દૂને સુકૃતવિહીને વૃજિનવિતાને ગિરીશ ધૃતમાને ।
કરુણાં નિધેહિ દીને ન શિવાજાને વિધાનમિહ જાને ॥ ૨૧॥

કતિવારં નતિવાકં શ્રુતિશતનુત પતિતપાવન બ્રૂયામ્ ।
લીલાશતલોલાખિલપાલાહતકાલ પાલયાભીલાત્ ॥ ૨૨॥

ધીરે જલધિગભીરે કરુણાસારે પરીતસુરવારે ।
ગૌરે વિષયવિદૂરે જલધરચિકુરે હરે મનો મેઽસ્તુ ॥ ૨૩॥

શૂરે સંવિત્સારે ક્ષિતિભૃદગારે ફણીન્દ્રકૃતહારે ।
મસ્તકધૃતજલપૂરે સર્વોદારે મમાસ્તુ નતિવાકઃ ॥ ૨૪॥

ઇતિ શ્રીશિવાર્યાસ્તુતિઃ સમાપ્તા ।

(૪૪)

Proofread by Sivakumar Thyagarajan Iyer

---

*Shivarya Stuti*

pdf was typeset on September 23, 2023

Please send corrections to *sanskrit@cheerful.com*